# प्रारम्भः

भाषासु रम्या भवति संस्कृतभाषा। संस्कृतभाषायाः सौन्दर्य-लालित्ययोः परिचायनमेव तृतीयकक्ष्यापाठैः उद्दिश्यते। छात्रेषु संस्कृतभाषा सरला,ललिता च इत्यवबोधोत्पादनाय आयोजितम् इदं पुस्तकम्।अतः छात्राणां कौतुकदायकानि ललितानि प्रवर्तनानि एव अत्र आयोजितानि।

सरलानि अनेकानि प्रवर्तनानि पाठपुस्तके,हस्तपुस्तके च आयोजितानि सन्ति। प्रवर्तनानि अध्यापकानां मार्गदायकानि भवन्ति, छात्राणां मनसि संस्कृतभाषां प्रति आकर्षणीयतां जनयितुं योग्यानि इतराणि प्रवर्तनानि अध्यापकैः अधिकतया आयोजनीयानि, कारयितव्यानि च। अस्माकम् एकमेव लक्ष्यं यत् संस्कृतभाषा रुचिरा इत्यवबोधःतथा इयं केरलभाषायाः जीवात् भूता इति छात्राणां मनसि अवबोधः जायेत। तृतीयकक्ष्यायां पठन्तः छात्राः बहूनि संस्कृतपदानि मातृभाषायां श्रुतवन्तः स्युः। तादृशपदानाम् असकृद् उपयोगः करणीयः।

पुस्तकेऽस्मिन् बालकविताः,लघुकथाः,संख्या,वासराः, सुभाषितानि, भगवद्गीतायाः केचन श्लोकाः च आयोजितानि। एतानि सरलया रीत्या अवतारणीयानि। तत्र अध्यापकैः अधिका श्रद्धा दातव्या।

प्रथमः पाठः

# चन्दिरबिम्बः

## आमुखम्

तृतीयकक्ष्यायाः प्रथमः पाठः चन्दिरबिम्बः इति बालगीतं भवति। चन्दिरबिम्बमधिकृत्य छात्राः सर्वे जानन्ति एव । मातृशिशोः संभाषणरूपेणैव गीतं दत्तम्। बालकवितानां परिचायनं, श्रवणम्, आलपनं च अनेन पाठेन उद्दिष्टम्।

बालगीतस्य वैयक्तिकालापः-संघालापः प्रकृतिपरिचयः, पदलेखनं, पदानि उपयुज्य लघुवाक्यलेखनं च पाठेऽस्मिन् करणीयम्।

पाठनाम - चन्दिरबिम्बः।

कालांशः - २०

उद्देश्यम् - लघुगीतद्वारा प्रकृतिपरिचायनम्।

नैपुणी - पदपरिचयः,वाक्यपरिचयः च।

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| आकाशदृश्यस्य चारुता। बालकविता।<br><br>प्रकृत्यां मनोरञ्जकानि बहूनि दृश्यानि सन्ति। तेषां दर्शनेन प्रकृतिस्नेहः संजायते। | पदज्ञानम्।<br>अयं - भवति एतयोः परिचयः। | बालकविताम् आलपति<br>पदपरिचयं करोति।<br>वाक्यपरिचयं करोति।<br>पदान्तर्गतानाम् अक्षराणां चयनं, वाचनं, लेखनं च करोति।<br>अकारान्तपुलिङ्गशब्दानां परिचयं लभते। |

पाठ्यवस्तुनः प्रारम्भात् पूर्वं मातृभाषायां परिचितानि संस्कृतपदानि उपयुज्य काचन क्रीडा आध्यापकेन आयोजनीया।

यथा - छात्राः वर्तुलाकारेण तिष्ठन्तु। अध्यापकः वृत्तस्य मध्यभागे स्थित्वा हस्तौ उन्नीय आकाशः इति उच्चैः वदति। शब्दश्रवणमात्रे सर्वे छात्राः हस्तान् उन्नयन्तु। पश्चात् भूमिः इति उक्त्वा हस्तौ भूमेः समान्तरं स्थापयति, छात्राः तदनुकुर्वन्ति। यदा अध्यापकः पातालम् इति उक्त्वा हस्तौ अधः स्थापयति छात्राः तदनुकुर्वन्ति। अनन्तरम् अध्यापकः आङ्ग्यपरिवर्तनं करोति (यथा भूमिः इति उक्त्वा हस्तौ उन्नयति, पातालम् इति उक्त्वा हस्तौ भूमेः समान्तरं स्थापयति।) छात्रैः अध्यापकस्य वचनं श्रुत्वा सम्यग् क्रीडा करणीया। अन्यथा क्रियते चेत् सः

क्रीडायाः बहिर्गच्छति। अन्ते यः अवशिष्यते सः विजयी भविष्यति।

एतादृश्यः सरलाः अन्याः क्रीडाः अध्यापकेन आयोजनीयाः।

अध्यापकः आकाशं प्रदर्श्य आकाशस्य वर्णः कः? इति पृच्छति। आकाशे रात्रिकाले किं किं पश्यति? चन्दिरं पश्यति, नक्षत्राणि पश्यति, मेघान् पश्यति। चन्दिरबिम्बं सर्वे दृष्टवन्तः वा? चन्दिरस्य वर्णः कः? आकृतिः का ? सः कुत्रास्ति? इत्यादीन् प्रश्नान् अध्यापकः पृच्छति। उत्तरकथनाय छात्राणां प्रेरणा करणीया। छात्राः सर्वे मातृभाषायाम् उत्तराणि वदन्ति। तानि अध्यापकः क्रोडीकरोतु।

चन्दिरबिम्बस्य किमपि गीतं भवन्तः श्रुतवन्तः वा? कैरल्यां पठितं किमपि बालगीतं स्मरन्ति वा भवन्तः? इत्युक्त्वा बालगीतानि स्मृत्वा आलपनाय निर्दिशति। पश्चात् चन्दिरबिम्बमधिकृत्य एकं बालगीतम् अध्यापकः गायति।

चन्दिरमातुल आयातु
मामकगेहम् आयातु।
पायसमधिकं दास्यामि
अङ्गणमध्ये क्रीडामः।। (चन्दिरमातुल)
अङ्गणमध्ये उद्याने
विलसति मन्दं कुन्दसुमम्।। (चन्दिरमातुल)

അമ്പിളിമാമാ വന്നാലും
എന്നുടെ വീട്ടിൽ വന്നാലും
പായസമധികം നൽകീടാം
നടുമുറ്റത്തു കളിച്ചീടാം (അമ്പിളിമാമാ)
മുറ്റത്തുള്ളൊരു പൂന്തോപ്പിൽ
മുല്ലപ്പൂവുകൾ വിടരുന്നു (അമ്പിളിമാമാ)

एतादृशानि अन्यानि परिचितानि बालगीतानि छात्राः आलपन्तु।

अनन्तरम् अध्यापकः एकां कथां कथयति। भवन्तः गोपस्य कथां श्रुतवन्तः वा? इति पृच्छति अध्यापकः। गोपः नाम बालकः आसीत् । सः रात्रौ गृहं गच्छन्नासीत्। मार्गे एकः कूपः तेन दृष्टः। कूपजले चन्दिरबिम्बं सः अपश्यत्। चन्दिरः कूपे पतितः इति मत्वा सः शीघ्रमेकां पाशेन बद्धां द्रोणीम् आनीय कूपे अक्षिपत्। चन्दिरम् उपरि आनेतुं प्रयत्नम् अकरोत्। किन्तु

द्रोणी एकस्मिन् शिलाखण्डे अवरुद्धा । गोपस्तु बलेन द्रोणीम् उन्नेतुम् अयतत। पाशस्य भङ्गेन गोपः अधः पतितः। तदा सः आकाशे हसन्तं चन्दिरं दृष्ट्वा लज्जितोऽभवत्। कथामेताम् अध्यापकः मातृभाषया अवतारयति।

## पठनप्रवर्तनानि।

**पठनप्रवर्तनम् - १ कवितायाः आलपनम्।**

**उद्देश्यम् - उचिततालेन स्पष्टमालपनम्।**

अध्यापकः प्रदत्तं गीतं त्रिचतुरं वारं कक्ष्यायाम् उच्चैः स्फुटतया सतालमालपति। कवितायाः अनुगानाय छात्रान् प्रेरयति। पश्चात् छात्रान् वर्तुलाकारे विन्यसति। गीतस्य प्रथमपङ्क्तिं प्रथमच्छात्रः तथा द्वितीयपङ्क्तिं द्वितीयच्छात्रः आलपतु। एवं चतसृणामपि पङ्क्तीनाम् आलपनानन्तरं पञ्चमः छात्रः पङ्क्तिचतुष्टयमपि उच्चैः आलपति, एतद् अनुवर्तते। प्रवर्तने सर्वेषामपि छात्राणां भागभागित्वम् आवश्यकम्। प्रवर्तनेन अनेन बालकविताश्रवणे तत्परता आलपनस्फुटता च जायते।

**मूल्यनिर्णयसूचिकाः।**

भागभागित्वम्।

अक्षरस्फुटता व्यक्तता च।

उचितः तालः।

**प्रवर्तनम् - २ - पदपरिचयः।**

**उद्देश्यम् - पदानि योजयित्वा वाचनं लेखनं च।**

अध्यापकः चार्ट्पत्रे सुवर्णम् इति पदं स्थूलाक्षरैः लिखति। अनन्तरं घटिका, माला, नाणकम्, किरीटम्, पेटिका, पात्रम् इत्यादीनि पदानि चित्रसहितं चार्ट्पत्रे विलिख्य सूत्रे श्रेणीरूपेण बध्नाति। सुवर्णम् इति पदं योजयित्वा अध्यापकः एतानि पदानि उच्चैः पठति। (यथा- सुवर्णघटिका, सुवर्णमाला इत्यादीनि) अनुवाचनाय छात्रान् प्रेरयति। पठितानि पदानि टिप्पणीपुस्तके लिखन्तु, कक्ष्यायाम् अवतारयन्तु छात्राः।

प्रवर्तनेन अनेन पदानि योजयित्वा वाचनं, लेखनम्, अवतारणं च भवत्।

अनन्तरं पाठपुस्तकस्थानि पदानि अध्यापकः पठति, तदनुसृत्य लेखनाय निर्दिशति।

सुवर्णनिमेषः।
सुवर्णकालः।
सुवर्णजयन्ती।
सुवर्णमाला।
सुवर्णशोभा।
सुवर्णघटिका।

**सुवर्ण**


घटिका


माला


नाणकम्


किरीटम्


पेटिका


पात्रम्

**मूल्यनिर्णयसूचिकाः।**

अक्षरज्ञानम्।
पदज्ञानम्।
उच्चारणम्।

**प्रवर्तनम् - ३ - वाक्यनिर्माणम्।**

**उद्देश्यम्- पदानि योजयित्वा वाक्यनिर्माणम्।**

अध्यापकः चार्ट्पत्रे अयं, भवति इति लिखति। एते पदे सूत्रस्य द्वयोः पार्श्वयोः बध्नाति। तयोर्मध्ये सज्जीकृतपूर्वाणि सचित्रचार्टपत्राणि विन्यस्य, तान् योजयित्वा उच्चैः पठति। यथा - अयं वृक्षः भवति,अयं बालः भवति इत्यादयः अकारान्तपुल्लिङ्गशब्दाः योजनीयाः। योजितानि वाक्यानि द्वित्रवारम् उच्चैः स्पष्टतया पठतु, अनुवाचनाय प्रेरयतु। अनन्तरं श्यामफलके लिखतु। तानि निरीक्ष्य उच्चैः पठित्वा च छात्राः स्वटिप्पणीपुस्तके लिखन्तु।

एवं पुस्तकान्तर्गतोदाहरणानुसारं पदानि योजयित्वा एकवारं वदन्तु। अनन्तरं स्वटिप्पणीपुस्तके लिखन्तु।

अयं वृक्षः भवति।
अयं गजः भवति।
अयं मूषकः भवति।
अयं चन्दिरबिम्बः भवति।
अयं बालः भवति।
अयं शुनकः भवति।

**मूल्यनिर्णयसूचिकाः।**

पदज्ञानम्।

आशयबोधः।

पदक्रमीकरणम्।

**अनुबन्धप्रवर्तनम्।**

**अक्षरक्रीडा।**

**उद्देश्यम्- पदान्तर्गतानाम् अक्षराणां प्रत्यभिज्ञानम्।**

अध्यापकः कानिचन अकारान्तपुल्लिङ्गपदानि चित्रसहितं चार्ट्पत्रे विलिख्य छात्रेषु वितरति। यथा - बालः, वृक्षः, काकः, शुकः, गजः इत्यादयः। अनन्तरं सज्जीकृतपूर्वाणि अक्षराणि अध्यापकः उत्पीठिकायाः उपरि प्रसारयति। छात्राः स्वहस्ते विद्यमानं पदं दृष्ट्वा पदान्तर्गताक्षराणि निर्धारयन्तु।

यथा- ब् आ ल् अः

**मूल्यनिर्णयसूचिकाः।**

अक्षराणां प्रत्यभिज्ञानम्।

क्रमीकरणम्।

(पदान्तर्गतानि अक्षराण्येव अध्यापकेन कागदखण्डे लेखनीयानि)

**अधिकवाचनांशः**

वैदिके, लौकिके च संस्कृते पदेषु उच्चारणसौकर्यर्थं संयुक्ताक्षराणां मध्ये इकारो उकारो वा योज्यते। उदा - पृथ्वी - पृथिवी, स्वर्ण - सुवर्ण, त्र्यम्बकं - त्रियम्बकं, वरेण्यं-वरेणियं इत्यादयः। एवं चन्द्रः - चन्दिरः।

चन्द्रनक्षत्रसंबन्धीनि लघुबालगीतानि संस्कृतेन,मातृभाषया वा आलपन्तु।

आकाशस्य, चन्द्रस्य, नक्षत्राणां च चित्राणि लिखन्तु, वर्णैः लिम्पन्तु।

**सहायकाः ग्रन्थाः** - संस्कृतबालगीतानां पुस्तकानि।

शिशुगीतम्, शिशुसंस्कृतम्, गीतसंस्कृतम्।

सान्द्रमुद्रिका - चित्रपतङ्गः, गेयसंस्कृतम् ।